३. "अथवा कृतवाग्द्वारे वंशेऽस्मिन् पूर्वसूरिभिः। मणौ बज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः ॥" अत्र 'वंशे' इति शब्देन कः वंशः उच्यते। तस्य वंशस्य राज्ञां चरितं कविः कथं वर्णितवान्। उक्तगुणैः राजा दिलीपः कियान् अलङ्कृतः तस्य वर्णनां कुर्वन्तु।

उत्तरम्- महाकवेः कालिदासस्य सृष्टिसम्भारे सर्वोत्तमा सृष्टिः रघुवंशम्। सुललितभाषया रघूणां चरितम् उपस्थापितवान् महाकविः। राज्ञः दिलीपात् आरभ्य अग्निवर्णपर्यन्तम् ऊनत्रिंशत् राजानः आसन्। ते एव ऊणविंशति सर्गेषु उपबृंहिताः।

महाकविः कालिदासः 'वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये' इत्यादिश्लोकेन जगतः मातरं पार्वतीं पितरञ्च महेश्वरं वन्दितवान्। अनन्तरं त्रिपु श्लोकेषु स्वस्य अनौद्धयत्वं वर्णयित्वा पञ्चमश्लोकात् रघुराजन्यवर्गस्य अमियं चरितम् उपस्थापितवान् कविः श्रेष्ठः। बज्रसमुत्कीर्णे मणौ यथा सूत्रस्य प्रवेशो भवति तथा पण्डितानां साहाय्येन कविः अतिसरलतया रघूणां चरितं वर्णितवान् इति वदन् श्लोकं रचितवान्।

'अथवा कृतवाग्द्वारे वंशेऽस्मिन् पूर्वसूरिभिः।
मणौ बज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः' ॥

महाकवेः कालिदासस्य आशयः यत् गर्भधानादिसंस्कारेण रघुराजन्यवर्गः जन्मनः एव शुद्धः। टीकाकारः अरूणगिरिः उक्तवान् – ' शुद्धिर्नाम गर्भधानकालादारभ्य होमादिभिः बीजादिदोषपरिमार्जितः।' तथा चोक्तवान् भगवान् मनुः

"गाभैर्होमैर्जातकर्मचौडमौञ्जनिबन्धनैः।
बैजिकं गर्भिकं चैनोद्विजानामपमृज्यते' ॥

रघुराजानः जन्मकालाद् एव शुद्धा आसन्। ते कर्मानुष्ठाने लिप्ताः आफलप्राप्तिपर्यन्तम्। कर्मैव आसीत् धर्मः। कर्मण्येव मनुष्याणामधिकारः इति तेषां विश्वासः आसीत्। आसमुद्रं तेषां विशालं साम्राज्यमासीत् तथापि ते निर्लिप्ताः आसन् भोगविलासेपु। सम्पूर्णा पृथिव्येव आसीत् तदधीना। तेषां रथचक्रमपि स्वर्गं पृष्टवत्। तथा च विस्तार्ये –

"सोऽयमाजन्मशुद्धानामाफलोदयकर्मणाम्।
आसमुद्रक्षितीशानामानाकरथवर्त्मनाम् ॥" इति।

रघुवंशीयाः शास्त्रीयविधानानुसारम् अग्नौ आहुतिं प्रायच्छन्। कामयमानानाम् कामं यथा ते अपूरयन् तथा अपराधिनां शास्तिमपि व्यदधुः ते। यथाकालं कर्मानुष्ठानं ते परिपालयन्ति स्म। तथा च

"यथाविधिहुताग्नीनां यथाकामार्चितार्थिनाम्।
यथापराधदण्डानां यथाकालप्रबोधिनाम्' ॥

तथापि रघ्वादिमहाराजाः दानार्थमेव सञ्चयं कुर्वन्ति स्म। सत्यवचनाय ते मितवाचः

आसन् । यशोलाभायैव ते युद्धं कुर्वन्तः आसन्, वंशवृद्ध्यर्थं ते दारपरिग्रहं कृतवन्तस्ते–

"त्यागाय सम्भृतार्थानां सत्याय मितभाषिणाम्।
यशसे विजिगीषूणां प्रजायै गृहमेधिनाम्" ॥

'स्वाध्यायोऽध्येतव्यः' इत्यादिवेदवचनानुसारं ते राजानः शैशवे वेदादीनि शास्त्राणि अधीतवन्तः। यौवने कामानुसारमुपभुक्तवन्तः कामादीन्। बार्धक्ये मुनिवृत्तिं परिलायन्तस्ते जीवनमतिवाहितवन्तस्ते। तथा चोक्तम् —

"शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्।
बार्धक्ये मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्" ॥

एतैः श्लोकैः महाकविः कालिदासः रघूणां गुणान् सुचारुभाषया प्रकाशितवान्। इदानीमस्माकं विचार्यो विषयस्तावद् एते गुणाः कथं दिलीपे संगच्छन्ते इति।

भगवान् मार्तण्डः ज्योतिपतिः सूर्यः स्थावरजङ्गमात्मकस्यास्य प्रपञ्चस्य कारणस्वरूपः। आदिसाहित्ये ऋग्वेदे श्रूयते च "सूर्यो आत्मा जगतस्तस्थूषश्च" इति। अस्मात् एव महतः सूर्यवंशस्योत्पत्तिः। महाराजः दिलीपः अस्य सूर्यवंशस्य अन्यतमः सुयोग्यः उत्तराधिकारी। महाकविः उक्तवान् यथा क्षीरसमुद्रे चन्द्रोत्पत्तिः तथा मनोः पवित्रवंशे दिलीपस्य उदयः॥

तदन्वये शुद्धिमति प्रसूतः शुद्धमत्तरः।
दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव' ॥

जन्मनः शुद्धस्य दैहिकबलशालिनः राज्ञः दिलीपस्य वक्षस्थलमासीद्विशालं स्कन्धाः आसन् वृषवत् बाहुद्वयं शालवृक्षात् दीर्घमासीत्।

आकारः सदृशप्रज्ञः प्रज्ञया सदृशागमः।
आगमैः सदृशारम्भः आरम्भः सदृशोदयः॥

हिंस्रजन्तूनां वासस्थानं समुद्रः परन्तु रत्नानामाकारोऽपि सः। तथापि सर्वे रत्नलोभिनः प्रवर्तन्ते स्म। तथा अनुजीविनां भयस्य कारणं सदपि सः तेषामाश्रयः आसीत्।

भीमकान्तैर्नृपगुणैः स बभुवोपजीविनाम्।
अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः॥

एतद्विहाय सूर्यः यथा सर्वाभ्यः दिग्भ्यः जलं शोषयित्वा यथाकालं बहुवृष्टिं कारयति स्म। तथा प्रजानामुन्नतिसाधनायैव तेभ्यः बलिं गृह्णाति स्म।

"सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः
शत्रुषु मित्रेषु च सः आसीत्समदर्शी॥" इति।

शत्रुषु मित्रेषु च स आसीत् समदर्शी। यद्यपि तस्य चतुरङ्गसेनावाहिना आसीत् तथापि स युद्धालुः नासीत्। स मन्त्रयति स्म गोपने। यथा जन्मान्तरीयः संस्कारः फलवान् भवति तथा राज्ञः कार्यानुष्ठानं फलवत् भवति स्म।

तस्य संवृतमन्त्रस्य गुढाकारेङ्गितस्य च।
फलानुमेयाः प्रारम्भाःसंस्काराः प्राक्तना इव॥

मृत्युभयात् भीताः शरीररक्षणाय तत्पराः इति परन्तु राजा दिलीपः धर्मरक्षणार्थं शरीरं रक्षति स्म। कारणं स जानाति स्म 'शरीरमाद्यं खलु धर्मसाधनम्' इति।

आसमुद्रपृथिव्याः अधिपतिः सन्नपि स निर्लोभी तथा कर्मयोगी च आसीत्। परवृत्तान्तं जानन्नपि सः मौनी, दानकार्ये निरहंकारी च आसीत्। तस्य मते परमो धर्मः इति। तस्मात्

स्मर्यति – ' शक्तानां भूषणं क्षमा' इति। शक्तिशाली अपि स क्षमापरायणः आसीत्।

ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः।
गुणागुणानुबन्धित्वात्तस्य सप्रसवा इव॥

निरहङ्कारी दिलीपः केवलं नाम्ना प्रजापालकः न, सः तु प्रजावत्सलः प्रजानां पितेवासीत्। दुष्टस्य दमनं शिष्टपालनमेव राज्ञां लक्ष्यभूतम्, ततः दिलीपोऽपि लोकस्थित्यर्थं दुष्टानां शास्तिं विदधाति स्म। तथा च 'त्याज्यो दुष्टः प्रियोऽप्यासीदङ्गुलीवोरगक्षता'। देवप्रीत्यर्थं स यज्ञं करोति स्म । देवयज्ञः दिलीपस्य प्रीत्यर्थं विष्टिं प्रददाति स्म।

दुदोह गां यज्ञाय शस्याय मघवा दिवम्।
सम्पद्विनिमयेनोभौ दधतुर्भुवनद्वयम्॥

अस्यैव गुणवर्णनाय महाकविः स्वपाण्डित्यं सम्यक् प्रदर्शितवान्। तस्मात् रघुवंशीयानां ये गुणाः प्रथममुक्ताः ते सर्वे दिलीपे संगच्छन्ते।